श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ चतुःपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुःपञ्चाशः सर्गः ॥

## सीतया पञ्चवानराणां मध्ये स्वाभूषणवस्त्राणां पातनं लङ्कां गत्वा रावणेन सीतायाः स्वान्तःपुरे रक्षणं जनस्थाने गुप्तचरतया निवासं कर्तुमष्टानां राक्षसानां प्रेषणं च

ह्रियमाणा तु वैदेही कञ्चिन्नाथमपश्यती।
ददर्श गिरिशृङ्गस्थान् पञ्च वानरपुङ्गवान्॥ **3.54.1** ॥

तेषां मध्ये विशालाक्षी कौशेयं कनकप्रभम्।
उत्तरीयं वरारोहा शुभान्याभरणानि च॥ **3.54.2** ॥

मुमोच यदि रामाय शंसेयुरिति भामिनी।
वस्त्रमुत्सृज्य तन्मध्ये निक्षिप्तं सहभूषणम्॥ **3.54.3** ॥

सम्भ्रमात् तु दशग्रीवस्तत्कर्म च न बुद्धवान्।
पिङ्गाक्षास्तां विशालाक्षीं नेत्रैरनिमिषैरिव॥ **3.54.4** ॥

विक्रोशन्तीं तदा सीतां ददृशुर्वानरोत्तमाः।
स च पम्पामतिक्रम्य लङ्कामभिमुखः पुरीम्॥ **3.54.5** ॥

जगाम मैथिलीं गृह्य रुदतीं राक्षसेश्वरः।
तां जहार सुसंहृष्टो रावणो मृत्युमात्मनः॥ **3.54.6** ॥

उत्सङ्गेनैव भुजगीं तीक्ष्णदंष्ट्रां महाविषाम्।
वनानि सरितः शैलान् सरांसि च विहायसा॥ **3.54.7** ॥

स क्षिप्रं समतीयाय शरश्चापादिव च्युतः।
तिमिनक्रनिकेतं तु वरुणालयमक्षयम्॥ **3.54.8**॥

सरितां शरणं गत्वा समतीयाय सागरम्।
सम्भ्रमात् परिवृत्तोर्मी रुद्धमीनमहोरगः॥ **3.54.9**॥

वैदेह्यां ह्रियमाणायां बभूव वरुणालयः।
अन्तरिक्षगता वाचः ससृजुश्चारणास्तदा॥ **3.54.10**॥

एतदन्तो दशग्रीव इति सिद्धास्तथाब्रुवन्।
स तु सीतां विचेष्टन्तीमङ्केनादाय रावणः॥ **3.54.11**॥

प्रविवेश पुरीं लङ्कां रूपिणीं मृत्युमात्मनः।
सोऽभिगम्य पुरीं लङ्कां सुविभक्तमहापथाम्॥ **3.54.12**॥

संरूढकक्ष्यां बहुलां स्वमन्तःपुरमाविशत्।
तत्र तामसितापाङ्गीं शोकमोहसमन्विताम्॥ **3.54.13**॥

निदधे रावणः सीतां मयो मायामिवासुरीम्।
अब्रवीच्च दशग्रीवः पिशाचीर्घोरदर्शनाः॥ **3.54.14**॥

यथा नैनां पुमान् स्त्री वा सीतां पश्यत्यसम्मतः।
मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च॥ **3.54.15**॥

यद् यदिच्छेत् तदैवास्या देयं मच्छन्दतो यथा।
या च वक्ष्यति वैदेहीं वचनं किञ्चिदप्रियम्॥ **3.54.16**॥

अज्ञानाद् यदि वा ज्ञानान्न तस्या जीवितं प्रियम्।
तथोक्त्वा राक्षसीस्तास्तु राक्षसेन्द्रः प्रतापवान्॥ **3.54.17**॥

निष्क्रम्यान्तःपुरात् तस्मात् किं कृत्यमिति चिन्तयन्।
ददर्शाष्टौ महावीर्यान् राक्षसान् पिशिताशनान्॥ **3.54.18**॥

स तान् दृष्ट्वा महावीर्यो वरदानेन मोहितः।
उवाच तानिदं वाक्यं प्रशस्य बलवीर्यतः॥ **3.54.19** ॥

नानाप्रहरणाः क्षिप्रमितो गच्छत सत्वराः।
जनस्थानं हतस्थानं भूतं पूर्वं खरालयम्॥ **3.54.20** ॥

तत्रास्यतां जनस्थाने शून्ये निहतराक्षसे।
पौरुषं बलमाश्रित्य त्रासमुत्सृज्य दूरतः॥ **3.54.21** ॥

बहुसैन्यं महावीर्यं जनस्थाने निवेशितम्।
सदूषणखरं युद्धे निहतं रामसायकैः॥ **3.54.22** ॥

ततः क्रोधो ममापूर्वो धैर्यस्योपरि वर्धते।
वैरं च सुमहज्जातं रामं प्रति सुदारुणम्॥ **3.54.23** ॥

निर्यातयितुमिच्छामि तच्च वैरं महारिपोः।
नहि लप्स्याम्यहं निद्रामहत्वा संयुगे रिपुम्॥ **3.54.24** ॥

तं त्विदानीमहं हत्वा खरदूषण घातिनम्।
रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्धनः॥ **3.54.25** ॥

जनस्थाने वसद्भिस्तु भवद्भी राममाश्रिता।
प्रवृत्तिरुपनेतव्या किं करोतीति तत्त्वतः॥ **3.54.26** ॥

अप्रमादाच्च गन्तव्यं सर्वैरेव निशाचरैः।
कर्तव्यश्च सदा यत्नो राघवस्य वधं प्रति॥ **3.54.27** ॥

युष्माकं तु बलं ज्ञातं बहुशो रणमूर्धनि।
अतश्चास्मिञ्जनस्थाने मया यूयं निवेशिताः॥ **3.54.28** ॥

ततः प्रियं वाक्यमुपेत्य राक्षसा
  महार्थमष्टावभिवाद्य रावणम्।

विहाय लङ्कां सहिताः प्रतस्थिरे
    यतो जनस्थानमलक्ष्यदर्शनाः ॥ **3.54.29** ॥

ततस्तु सीतामुपलभ्य रावणः
    सुसम्प्रहृष्टः परिगृह्य मैथिलीम्।
प्रसज्य रामेण च वैरमुत्तमं
    बभूव मोहान्मुदितः स रावणः ॥ **3.54.30** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुःपञ्चाशः सर्गः ॥